# Sadhubhih Kritam Balakrishna Stotram

# સાધુભિઃ કૃતં બાલકૃષ્ણસ્તોત્રમ્

## Document Information

Text title : Sadhubhih Kritam Balakrishna Stotram

File name : sAdhubhiHkRRitaMbAlakRRiShNastotram.itx

Category : vishhnu, vishnu, krishna, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 4 | adhyAya 55/40-65||

Latest update : May 15, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskcript**.

May 15, 2026

*sanskritdocuments.org*

# સાધુભિઃ કૃતં બાલકૃષ્ણસ્તોત્રમ્

યે ભજન્તિ સદા કૃષ્ણનારાયણપરેશ્વરમ્ ।
સ્તુવન્તિ પ્રત્યહં શ્રીમદ્બાલકૃષ્ણં પ્રભુમ્પતિમ્ ॥ ૪૦॥

“કૃષ્ણનારાયણ કૃષ્ણનારાયણ નરાયણ ।
બાલકૃષ્ણાઽનાદિકૃષ્ણનારાયણ રમાયણ” ॥ ૪૧॥

એવં રટન્તિ નિત્યં તં પરમેશં હિ સાધવઃ ।
તેષાં સત્સઙ્ગલાભેન પુરુષાર્થચતુષ્ટયમ્ ॥ ૪૨॥

નમસ્તેભ્યઃ સમસ્તેભ્યઃ સાધુભ્યોઽસ્તુ મુહુર્મુહુઃ ।
નમઃ સાધુસ્વરૂપાય શ્રીકૃષ્ણસ્વામિને નમઃ ॥ ૪૩॥

નમઃ સર્વાધિપતયે સર્વપૂર્વાય ચક્રિણે ।
નમોઽવતારપૂજ્યાય સૃષ્ટીનાં પ્રભવે નમઃ ॥ ૪૪॥

જ્ઞાનાનાં પ્રભવે તસ્મૈ કર્મણાં પ્રભવે નમઃ ।
ઈશ્વરાણાં પ્રશાસ્ત્રે ચ દેવાનાં પ્રભવે નમઃ ॥ ૪૫॥

ઋષીણાં ચ ગ્રહાણાં ચ ઋક્ષાણાં પ્રભવે નમઃ ।
વિદ્યુતાં તૈજસાનાં ચ મેઘાનાં પ્રભવે નમઃ ॥ ૪૬॥

વર્ષાણાં ચ ભૂધરાણાં નદીનાં પ્રભવે નમઃ ।
સર્વૌષધીનાં ભક્ષ્યાણાં તૃપ્તીનાં પ્રભવે નમઃ ॥ ૪૭॥

નમો ધર્માદિરૂપાણાં જનયિત્રે પરાત્મને ।
તસ્મૈ રસાનાં પ્રભવે રત્નાનાં પ્રભવે નમઃ ॥ ૪૮॥

ઋત્વાદીનાં પ્રભવે ચ વાર્તાનાં પ્રભવે નમઃ ।
વિશ્વાનાં પ્રભવે સર્વવિદ્યાનાં પ્રભવે નમઃ ॥ ૪૯॥

વ્રતાનાં પ્રભવે તસ્મૈ મન્ત્રાણાં પ્રભવે નમઃ ।
સિદ્ધીનાં પ્રભવે સર્વૌજસાં ચ પ્રભવે નમઃ ॥ ૫૦॥

લક્ષ્મીનાં પતયે તસ્મૈ શ્રીસ્વામિને નમો નમઃ ।
નમસ્તસ્મૈ વરદાય પ્રજેશાય મહાત્મને ॥ ૫૧॥

અણવે મહતે તસ્મૈ સર્વગાય નમો નમઃ ।
નમો યજ્ઞસ્વરૂપાય નમઃ પૂજાત્મકાય ચ ॥ ૫૨॥

નમઃ શસ્ત્રાસ્ત્રધારાય માધવીષ્ટાય તે નમઃ ।
નમસ્તીર્થાય દેવાય વેદિશીલાય તે નમઃ ॥ ૫૩॥

નમો વીર્યાય કામાય સદાનન્દાય તે નમઃ ।
નમઃ શ્રીબાલકૃષ્ણાયાઽભયદાનાય તે નમઃ ॥ ૫૪॥

વરદાય વરેણ્યાય નમસ્તેઽપ્રતિમાય ચ ।
હવ્યકવ્યાદિરૂપાય મેધ્યાય વિષ્ણવે નમઃ ॥ ૫૫॥

પઙ્ક્તિપાવનરૂપાય નારાયણાય તે નમઃ ।
નમઃ શુદ્ધાય બુદ્ધાય સર્વનેત્રાય તે નમઃ ॥ ૫૬॥

દૃશ્યાદૃશ્યસ્વરૂપાય દમ્પતીરૂપિણે નમઃ ।
ત્યાગિને ચ સુવર્ણાય સૌમ્યરૂપાય તે નમઃ ॥ ૫૭॥

નમઃ કાન્તાય શ્રીશાય વલ્લભાર્યાય તે નમઃ ।
વત્સલાયોપજીવ્યાય મૃત્યુઘ્નાય ચ તે નમઃ ॥ ૫૮॥

અપ્રમેયાય બૃહતે કુલાલાય નમો નમઃ ।
રક્ષોઘ્નાય વિષઘ્નાય ભક્તવેદ્યાય તે નમઃ ॥ ૫૯॥

નિર્વિશેષાય હૃદ્યાય મોક્ષદાય ચ તે નમઃ ।
નમો ગોપાલબાલાય કમ્ભરાશ્રીભવાય ચ ॥ ૬૦॥

કામદાય ચ યુવતીસેવિતાય નમો નમઃ ।
નમો વૃદ્ધાતિવૃદ્ધાય પુરાણાય ચ તે નમઃ ॥ ૬૧॥

લોકધાત્રી ત્વિયં ભૂમિર્મૂર્તિર્દિવ્યા હિ તે મતા ।
દ્યૌઃ સર્વં મસ્તકં યસ્ય પાતાલં પાદસંજ્ઞિતમ્ ॥ ૬૨॥

સૃષ્ટયશ્ચોદરે યસ્ય તસ્મૈ કૃષ્ણાય તે નમઃ ।
અનાદિશ્રીકૃષ્ણનારાયણાય પરમાત્મને ॥ ૬૩॥

કુઙ્કુમવાપિકાક્ષેત્રવાસબાલાય તે નમઃ ।
સર્વહૃત્સુ નિવાસાયાઽન્તર્યામિણે ચ તે નમઃ ॥ ૬૪॥

નારાયણસ્તવેનૈવં યે સ્તુવન્ત્યાત્મનાં પતિમ્ ।
શ‍ૃણ્વન્તિ સ્તવનં ચૈવં તેષાં ભાગ્યોદયો ભવેત્ ॥ ૬૫॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ તિષ્યસન્તાનાત્મકસ્ય ચતુર્થખણ્ડે
પપ-અધ્યાયાન્તર્ગતં શર્કરાપુરે સત્સઙ્ગે સાધુભિઃ કૃતં
બાલકૃષ્ણસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૪। અધ્યાય પપ/૪૦-૬પ॥

lakShmInArAyaNIyasaMhitA . khaNDa 4. adhyAya 55/40-65..

Proofread by PSA Easwaran

*Sadhubhih Kritam Balakrishna Stotram*
pdf was typeset on May 15, 2026

Please send corrections to *sanskrit@cheerful.com*